## Dadima

**दाडिममाहुः खरकं मधुराम्लफलं च रक्तकुसुमं च ।**
**शतवल्लभं शुकेष्टं सपारदं बीजपूरकं चेति ।। (Aa ma)**

Synonyms of Dadima are Kharaka, Madhura amla phala, Raktakusuma, Satavallabha, Sukesta, Saparada, Bijapuraka.

**दाडिमः करको दन्तबीजो लोहितपुष्पकः । (Bpn)**

Dadima, Karaka, Dantabija, Lohitapuspaka are the synonyms of Dadima.

**दाडिमो डाडिमीसारः कुट्टिमः फलषाडवः ।।**
**करको रक्तबीजश्च सुफलो दन्तबीजकः ।**
**मधुबीजः कुचफलो रोचनः शूकवल्लभः ।।**
**मणिबीजस्तथा वल्कफलो वृत्तफलश्च सः ।**
**सुनीलो नीलपत्रश्च ज्ञेया सप्तदशाह्वयः ।। (Rjn)**

Dadimisara, Kuttima, Phalasadava, Karaka, Raktabija, Suphala, Dantabijaka, Madhubija, Kucaphala, Rocana, Sukavallabha, Manibija, Valkaphala, Vrttaphala, Sunila, Nilapatra, Saptadasahvaya are the 17 synonyms of Dadima.

**उद्रिक्तापित्तान् जयति त्रिदोषान् स्वादु दाडिमम् ।**
**पित्ताविरोधी नात्युष्णमम्लं वातकफापहम् ।।**
**सर्वं हृद्यं लघु स्निगधं ग्राही रोचनदीपनम् । (Mdn)**

It is pitta avirodhi (does not vitiate pitta) , laghu, snigdha in guna, natyusna (slightly usna) in potency, amla in taste, decreases vata kapha, is hrdya, grahi, rocana and dipana in karma.

तत्फलं त्रिविधं स्वादु स्वाद्वम्लं केवलाम्लकम् ।
तत्तु स्वादु त्रिदोषघ्नं तृड्दाहज्वरनाशनम् ॥
हृत्कण्ठमुखरोगघ्नं तर्पनं शुक्ललं लघु ।
कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम् ॥

स्वाद्वम्लं दीपनं रुच्यं किञ्चित् पित्तकरं लघु ।

अम्लं तु पित्तजनकमावातकफापहम् ॥ (Bpn)

Dadima phala is of three types: svadu, svadu amlam, kevala amla.

Svadu phala is kashaya in anurasa, laghu, snigdha in property, alleviates tridosha, trt, daha, jvara, hrt-kantha-mukha roga, is tarpana, sukrala, grahi, medha bala vaha.

Svadu amla phala is dipana, rucya, slightly increases pitta and laghu in guna.

Amla phala increases pitta, cures vitiation of ama, vata and kapha.

स्निग्धोष्णं दाडिमं हृद्यं कफपित्ताविरोधि च ।
द्विविधं तच्च विज्ञेयं मधुरं चाम्लमेव च ॥ (Dhn)

Dadima is snigdha in property, usna in potency, hrdya, not vitiating kapha and pitta. It is of two types madhura and amla.

दाडिमं मधुरमम्लकषायं
कासवातकफपित्तविनाशी ।
ग्राहि दीपनकरं च लघूष्णं
शीतलं श्रमहरं रुचिदायि ॥
दाडिमं द्विविधमीश्तिमार्यै-
रलमेक्मपरं मधुरं च ।
तत्र वातक्फ्हारी क्लिाम्लं
तापहारी मधुरं लघु पथ्यं ॥ (Rjn)

Dadima is madhura, amla, kashaya in taste, laghu in property, usna -sitala in potency, grahi, dipana, srama hara, rucidayi, cures kasa, vata, kapha, pitta. It is of two types, amla and madhura. Madhura variety is the best. Amla phala is vata kapha hara. Madhura phala reduces tapa, is laghu and pathya.

दाडिमं तुवरं चाम्लं मधुरं तृप्तिकारकम् ।
स्निग्धं च दीपनं ग्राहि हृद्यं चोष्णं रुचिप्रदम् ॥
लघ्वग्निदीपकं प्रोक्तं कफकासश्रमापहम् ।
मुखकण्ठरुजं पित्तं नाशयेदिति कीर्त्तितम् ॥

मधुरं तृप्तिकरं धातुवृद्धिकरं लघु ।

तुवरं ग्राहकं स्निग्धं मेध्यं बल्यं च माधुरं ॥
पथ्यं त्रिदोषतृड्दाहज्वरहृद्रोगनाशनम् ।
मुखरोगं कण्ठरोगं नाशयेदिति कीर्त्तितम् ॥

मधुराम्लं तत्तु रुच्यं दीपनं च मतं लघु ।

वातापित्तप्रशमनं तदम्लं पित्तलं मतम् ॥
रक्तपित्तकरं चैव कफवातविनाशकम् ।

शुष्कं बालं च तत्प्रोक्तं रुच्यं च हृदयप्रियम् ॥
वातानुलोमनकरं मुनिभिः परिकीर्त्तितम् । (Nir)

Dadima is tuvara, amla, madhura in taste, snighda, laghu in property, usna in potency, is trptikaraka, dipana, grahi, hrdya, ruciprada, agni dipaka, cures kapha, kasa, srama, mukha kantha ruja, pitta.

Madhura phala is trptikara, dhatuvrddhikara and laghu.

Tuvara phala is grahi, snigdha, medhya, balya, madhura, pathya, cures tridosha, trt, daha, jvara, hrdroga, mukharoga, kantharoga.

Madhura amla phala is rucya, dipana, laghu, pacifies vata and pitta.

Amla phala increases pitta, induces raktapitta, alleviates kapha and vata.

Suska bala phala is rucya, hrdaya priya, causes vatanuloma.

**अम्लं कषायमधुरं वातघ्नं ग्राहि दीपनम् ।**

**स्निग्धोष्णं दाडिमं हृद्यं कफपित्ताविरोधि च ॥**

**रूक्षाम्लं दाडिमं यत्तु तत् पित्तानिलकोपनम् ।**

**मधुरं पित्तनुत् तेषां तद्धि दाडिममुत्तमम् ॥ (C.S.Su २७)**

Amla-Kashya- Madhura Dadima is Vataghna, grahi Dipana.

Snigdha Usna Dadima is Hrdya, Kapha Pitta Virodhi.

Ruksa Amla Dadima is Pitta Anila Kopana.

Madhura Dadima is Pitta hara and this Dadima is the best.

**मधुरं तु त्रिदोषघ्नं स्वाद्वम्लं वातपित्तनुत् ।**
**असृक्पित्तकरं चाम्लं संग्राहि सर्वमुच्यते ॥**
**दाडिमं रोचनं हृद्यं दीपनं नातिपित्तलम् ।**
**मेध्यं कण्ठास्यरोगघ्नं तर्पणं कफवातजित् ॥**
**वर्चोविबन्धनं स्निग्धं कषायानुरसं लघु ।**
**द्विविधं तत्तु विज्ञेयं मधुराम्लविभेदतः ॥**
**अम्लं तु द्विविधं ज्ञेयं रूक्षाम्लं स्निग्धचुक्रकम् ।**
**स्वादु त्रिदोषतृड्दाहज्वरहृदोगनाशनम् ॥**
**रूक्षाम्लं दाडिमं यत्तु तत्पित्तानिलकोपनम् ।**
**पित्ताविरोधि नात्युष्णं स्निग्धाम्लं कफवातनुत् ॥ (Kdn)**

Madhura phala is Tridoshaghna, Svadu- Amla phala is Vata pitta hara, Asrk pitta hara, Amla phala is Grahi.

Dadima is Rocana, Hrdya, Dipana, Na ati pittala, Medhya, Kantha asya  rogaghna, Tarpana, Kapha Vata hara, Varca vibandhana, Snigdha in Property, Kashaya in Anurasa, Laghu.

Second variety is Madhura amla phala.

Amla phala is of two types Ruksa amla amd Snigdha cukraka.

Ruksa amla phala is Svadu in Taste Tridosha-Trt-Daha-Jvara-Hrdroga-nasana and is Pitta Anila kopana.Snigdha amla phala is Pitta virodhi, Na atyusna, and Kapha vata hara.

**पुटपाकेन विपचेत् सुपक्वं दाडिमीफलम् ।**
**तद्रसो मधुसंयुक्तः सर्वातीसारनाशनः ॥ (S.S)**

Dadima phala subjected to Putapaka and used along with Madhu is Sarva atisara nasana.

**विपाचितं दाडिमकल्कयुक्तं**
**तैलं भवेत्सर्षपसंभवं यत् ।**
**अभ्यञ्जनात्कुरुते नितान्त-**
**मुच्चैः स्तनौ वृद्धियुतौ च कर्णौ ॥ (Rajamartandam)**

Dadima kalka subjected to taila paka with Sarsapa taila when subjected to Abhyanjana on Stanya causes Stana vardhana.